संस्कृत सं.नं.८०

स्तोत्र

दुर्गास्तोत्र

६९८। स्तो. ८१

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः ॥ दुर्गास्तोत्रप्रारंभः ॥ श्रीभगवानु०
शुचिर्भूत्वामहाबाहोसंग्रामाभिमुखेस्थितः ॥ पराज
याय शत्रूणांदुर्गास्तोत्रमुदीरय ॥ १ ॥ संजयउवा० ॥ एवमु
क्तोर्जुनःसंख्येवासुदेवेनधीमता ॥ अवतीर्यरथात्पार्थस्तो
त्रमाहकृतांजलिः २ अर्जुनउ० ॥ नमस्तेसिद्धसेना
नीआर्येमंदारवासिनि कुमारीकालिकापालिकपिलेकृ
ष्णपिंगले ३ भद्रकालीनमस्तुभ्यंमहाकालीनमोस्तुते
चंडचंडेनमस्तुभ्यंतारिणीवरवर्णिनी ४ कात्यायनीमहा
भागेकरालीविजयेजये शिखपिछध्वजधरेनानाभरण
भूषिते ५ अट्टशूलप्रहरणेखड्गखेटकधारिणी गोपेंद्रस्या

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

रे

नुजेज्येष्ठेनंदगोपकुलोद्भवे ६ महिषासृक्पेनित्यंकौशि
कीपीतवासिनी अट्टहासेकोकमुखेनमस्तेस्तुरणप्रिये ७
भ उमेशाकंबरिश्वेतेकृष्णेकैटभनाशिनी हिरण्याक्षीविरूपाक्षी
सुधूम्राक्षीनमोस्तुते ८ वेदश्रुतिमहापुण्येब्रह्मण्येजातवे
दसि जंबूकटकचैत्येषुनित्यंसंनिहितालये ९ त्वंब्रह्म
विद्या विद्यानांमहानिद्राचदेहिनां स्कंदमाताभगवतीदुर्गे
कांतारवासिनि १० स्वाहाकारस्वधाचैवकालकाष्ठासर
स्वति सावित्रीवेदमाताचतथावेदांतउच्यते ११ स्तुता
सित्वंमहादेवीविशुद्धेनांतरात्मना जयोभवतुमेनित्यंत्व
त्प्रसादाद्रणाजिरे १२ कांतारभयदुर्गेषुभक्तानांपालने

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

(2A)

षुच नित्यंजयसिपातालेयुद्धेजयसिदानवान् १३ त्वं
जृंभिनीमोह्निनीचमायाह्रीश्रीस्तथैवच संध्याप्रभावती
चैवसावित्रीजननीतथा १४ तुष्टिःपुष्टिर्धृतिर्दीप्तिर्द्रा श्चं
दित्यविवर्धिनी भूतिर्भूतिमतांसंख्येवीक्ष्यसेसिद्धचार
णैः १५ संजयउवाच ततःपार्थस्यविज्ञायभक्तिंमान
ववत्सला अंतरिक्षगतोवाचगोविंदस्याग्रतस्थिता १६
श्री देव्युवाच स्वल्पेनैवतुकालेनशत्रूंजेष्यसिपांडव नर
स्त्वमसि दुर्धर्षनारायणसहायवान् १७ अजे
यस्त्वंरणेरीणामपिवज्रभृतःस्वयं इत्येवमुक्त्वावरदाक्ष
णेनांतरधीयत १८ लब्ध्वावरंतुकौंतेयोमेनेविजयमात्मनः

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

आरुरोहततःपार्थोरथंपरमसंगतं ३९ कृष्णार्जुनावेक
दु॰स्तो॰ रथौदिव्योशंखौप्रदध्मतुः । यइदंपठतेस्तोत्रंकल्यमुत्
२ त्साहमानवः २० यक्षरक्षःपिशाचेभ्योनभयंविद्यतेसदा
नचापिरिपवस्तेभ्यःसर्पाद्याश्चेदंष्ट्रिणः २१ नभयंविद्य
तेतस्यसदाराज्यकुलादपि विवादेजयमाप्नोतिबद्धोमुच्येतबंध
नात् २२ दुर्गंतरतिचावश्यंतथाचोरैर्विमुच्यते संग्रामेवि
जयंनित्यंलक्ष्मीप्राप्नोतिकेवलं २३ आरोग्यबलसंपन्नोजी
वेद्वर्षशतंतथा एतद्दृष्टंप्रसादात्तुमयाव्यासस्यधीमतः २४
मोहात्त्वेतौनजानंतिनरनारायणावृषी इतिश्रीमन्महाभारते
भीष्मपर्वणीश्रीकृष्णसूचितअर्जुनप्रार्थितश्रीदुर्गास्तोत्रंसं २
पूर्णं श्रीसद्गुरुनाथार्पणमस्तु ६

# मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com